नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

# P-95-Sanskritam-II (Supp.)

No. of Printed Pages – **07**

# प्रवेशिका पूरक परीक्षा, 2018

## संस्कृतम् (द्वितीयपत्रम्)

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) **सर्वे** प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

## गद्य भागः

"अतिलघूत्तरात्मकाः प्रश्नाः"

1. पञ्चतन्त्रस्य प्रथमतन्त्रस्य नाम किम् अस्ति ? **1**

2. ताम्रचूडः कीदृशः आसीत् ? **1**

3. मार्जारः कः आसीत् ? **1**

4. चित्ररथः कः आसीत् ? **1**

5. प्राणत्यागेऽपि उपस्थिते किं नैव कर्तव्यम् ? **1**

"लघूत्तरात्मकाः प्रश्नाः"

6. सुहृदां वचनम् अश्रुत्वा जनः कथं विनश्यति ? **2**

7. ताम्रचूडपरिव्राजकस्य जीवनयात्रा कथं समाचरति ? **2**

8. ब्राह्मणः दीनारं कथं प्राप्नोति ? **2**

9. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या – **1 + 4 = 5**

(क) तदाकर्ण्याऽहं (हिरण्यकः) सकलयूथपरिवृतः तत्र गतः । उत्पत्य च तस्मिन् भिक्षापात्रे समारुढः । तत्र भक्ष्यविशेषाणि सेवकानां दत्वा पश्चात् स्वयमेव भक्षयामि । एवं नित्यमेव तदन्नं भक्षयामि । अथ कदाचित् तेन मम रक्षणार्थं महान् यत्नः कृतः जर्जरवंशश्चैकः समानीतः । तेन सुप्तोऽपि मम भयात् भिक्षापात्रं ताडयति ।

(ख) अस्ति कस्मिंश्चिदधिष्ठाने चित्ररथो नाम राजा । तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति । तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति । षण्मासे-षण्मासे पिच्छमेकैकं परित्यजन्ति । अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः तैश्चोक्तः-अस्माकं मध्ये त्वया न वस्तव्यम् । येन कारणेनास्माभिः षण्मासान्ते पिच्छैकदानं कृत्वा गृहीतमेतत्सरः ।

10. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या – **1 + 4 = 5**

(क) कस्मिंचिदुद्देशे सिंहदम्पती प्रतिवसतः स्म । अथसिंही पुत्रद्वयम् अजीजनत् । सिंहो नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति । अथाऽन्यस्मिन्नहनि तेन किमपि नासादितम् । वने भ्रमतोऽपि रविरस्तं गतः । अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः । सिंहश्च 'बालकोऽयम्' इति अवधार्य दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान् ।

(ख) ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः-बहुमत्स्योऽयं ह्रदो दृश्यते, स्वल्पसलिलश्च । तत्र प्रभातेऽत्रागमिष्यामः । एवमुक्त्वा स्वगृहं गताः । मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः । ततो मण्डूक आह-भो ! शतबुद्धे ! श्रुतं धीवरोक्तं भवता तत्किमत्र युज्यते कर्त्तुम् ?

11. एकस्याः कथायाः सारांशः संस्कृतभाषायां लिखत – **4**

(क) हिरण्यक ताम्रचूड़ कथा ।

(ख) काष्ठभ्रष्ट कच्छप कथा ।

## पद्यभागः

"अतिलघूत्तरात्मकाः प्रश्नाः"

12. कः कदाचित् न जायते ? **1**

13. अर्जुनस्य अधिकारः कुत्र भवेत् ? **1**

14. नरकस्य द्वारं कतिविधिम् ? **1**

15. आत्मनः रिपुः कः ? **1**

16. महात्मनां सदसि किं प्रकृतिसिद्धम् ? **1**

"लघूत्तरात्मकाः प्रश्नाः"

17. सात्विकप्रियाः चेतोहराः आहाराः के ? **2**

18. मानसं तपः किम् उच्यते ? **2**

19. लोकः कम् अनुवर्तते ? **2**

20. कैकेय्याः वचनं संश्रुत्य रामः प्रथमवाक्यं किम् अवदत् ? **2**

21. रघुं निकषा कीदृशः कौत्सः आगतवान् ? **2**

22. अधोलिखितेषु द्वयोः पद्ययोः सप्रसङ्गं व्याख्या कार्या – **1 + 2 × 2 = 6**

(क) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।

स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।

(ख) तदप्रियममित्रघ्नो वचनं मरणोपमम् ।

श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत् ।।

(ग) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।

23. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसङ्ग–भावार्थः लेख्यः **1 + 3 = 4**

(क) न जायते म्रियते वा कदाचि –

न्नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे ।।

(ख) तवार्हतो नाभिगमेन तृप्तं,

मनोनियोगक्रिययोत्सुकं मे ।

अप्याज्ञया शासितुरात्मना वा,

प्राप्तोऽसि सम्भावयितुं वनान्माम् ।

"छन्द–अलंकार–कोष–प्रश्नाः"

24. अधोलिखितेषु छन्दःसु द्वयोः लक्षणोदाहरणे लिखत – **1 + 1½ × 2 = 5**

(क) वसन्ततिलका

(ख) मन्दाकान्ता

(ग) स्रग्धरा

25. द्वयोः अलंकारयोः लक्षणोदाहरणे लिखत – **1 + 1½ × 2 = 5**

(क) अनुप्रासः

(ख) उपमा

(ग) विभावना

26. अधोलिखित–कोषप्रश्नाः समाधेयाः **1 + 4 = 5**

(क) देवयोनीनां चत्वारि नामानि लिखत ।

(ख) अधोलिखितानां शब्दानां प्रत्येकस्य पर्यायद्वयं लिखत ।

ब्रह्मा, पार्वती, शिवः लक्ष्मीः

"शब्द रूप–धातु रूप– रचना–प्रश्नाः"

27. निर्देशानुसारं शब्दरूपाणि लिखत – **1 + 1 + 1 + 1 = 4**

(क) बालक – शब्दस्य – सप्तमी – विभक्ति – एकवचनम्

(ख) करिन् – शब्दस्य – प्रथमा – विभक्ति – बहुवचनम्

(ग) जगत् – शब्दस्य – द्वितीया – विभक्ति – एकवचनम्

(घ) वधू – शब्दस्य – प्रथमा – विभक्ति – एकवचनम्

28. निर्देशानुसारं धातुरूपाणि लिखत – **1 + 1 + 1 + 1 = 4**

(क) कृ – धातु – लट्लकार – प्रथमपुरुष – एकवचनम्

(ख) चुर् – धातु – लङ्लकार – प्रथमपुरुष – बहुवचनम्

(ग) क्रीड् – धातु – लृट्लकार – मध्यमपुरुष – एकवचनम्

(घ) पृच्छ् – धातु – लोट्लकार – उत्तमपुरुष – बहुवचनम्

29. कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत – **4**

(क) श्रीरामः

(ख) भारतीयसंस्कृतिः

(ग) नूतनवर्षम्

30. भवती गार्गी, राजकीय प्रवेशिका संस्कृत विद्यालय – शिवानन्दनगरस्य छात्रा, भ्रातुः विवाहकारणेन दिनद्वयस्य अवकाशार्थं प्रधानाध्यापकाय प्रार्थना-पत्रं लिखतु । **3**

**अथवा**

नगरपालिकाध्यक्षाय नगरे प्रकाशव्यवस्थायै प्रार्थनापत्रं लिखतु ।

---